३स्नुषायां, ४नवोढ़ायाम्, भार्य्यायां ५शारिवोषधौ ६शठ्याम्, च मेदि० ।

**ब(व)धूटी** स्त्री अल्पा ब(व)धूः अल्पार्थे टि वा ङीप् । अल्प-वयस्कायां नार्य्याम् "गोपबधूटीदुकूलचौराय" भाषाप० ।

**ब(व)धूत्सव** पु०ब(व)ध्वा उत्सव आर्त्तवम् रजः स इव प्रसवः पत्रादिर्यस्य । रक्ताम्लाने राजनि० ।

**बधोद्यत** त्रि०बधाय उद्यतः । मारणार्थमुद्युक्ते आततायिनि अमरः । आततायिनशब्दे ६४७ पृ० दृश्यम् ।

**बध्य** त्रि०बधमर्हति बध+यत् ।१बधार्हे अमरः । बन्ध-कर्मणि क्यप् ।२कारारोद्धव्ये । आधारे क्यप् । ३बन्धनस्थाने च

**बध्यपाल** पु० बध्यं कारागारं पालयति पालि-अण् उप० स० । कारागृहरक्षके । विष्णु० पु० २अंशे ६अ० ।

**बध्यभूमि** स्त्री हन-भावे यत् बधादेशः बध्यस्य भूमिः । श्मशाने बधस्थाने बध्यस्थानादयोऽप्यत्र [तद्गोत्रापत्ये पुंस्त्री०

**बध्योग** पु०ऋषिभेदे ततो विदा० गोत्रापत्ये अञ् । बाध्योग

**बध्र** न० बन्ध-ष्ट्रन् नलोपः । १सीसके, २चर्म्मनयरज्ज्वां स्त्री ङीप् । पृषो० नस्य रः । बध्रीत्यप्यत्र स्त्री अमरः ।

**बन** याचने तना० आत्म० द्विक० सेट् । बनुते अबनिष्ट । बेने उदित् क्त्वा वेट् बनित्वा बान्त्वा बान्तः । [बबन्ध बध्यते ।

**बन्ध** बन्धने क्र्या०पर०सक०अनिट् । बध्नाति अभान्त्सीत्

उद्+उत्तोल्य बन्धने "उद्बन्धनमृता ये च" स्मृतिः ।

अनु+नियतपूर्व्ववर्त्तित्वे अनुगमने च । "तेषु किं भवतः स्नेहमनुबध्नाति मानसम्" देवीमा० ।

नि+नियमेन बन्धने निबन्धशब्दे दृश्यम् ।

निर्+आग्रहे निर्बन्धशब्दे दृश्यम् ।

प्र+ग्रन्थने काल्पनिककथने च प्रबन्धशब्दे दृश्यम् ।

प्रति+निरोधे "प्रतिबध्नाति हि श्रेयः" रघुः । व्याप्तौ च प्रति० बन्धशब्दे दृश्यम् ।

सम्+सम्यक्बन्धे संसर्गे च ।

**बन्ध** संयमने चुरा०उभ०सक०सेट् । बन्धयति ते अबबन्धत् त

**बन्ध** पु०बन्ध-घञ् । १संयमने निगडादिना गतिरोधने २स्नेहादिवेष्टनस्थले च । स्नेहशब्दे २६२५पृ०दृश्यम् । करणे कर्म्मणि वा घञ् ।३देहे ४ऋणशोधनविश्वासाय स्थापिते द्रव्ये आधौ च । आधिशब्दे ७११पृ० दृश्यम् । करणे घञ् ।५गतिरोधसाधने शब्दर० । रतिबन्धभेदाश्च रतिमञ्जर्य्युक्ता यथा "पद्मासनो नागपदो लतावेष्टोऽर्द्धसंपुटः कुलिशं सुन्दरश्चैव तथा केसर एव च । हिल्लोलो नरसिंहोऽपि विपरीतस्तथाऽपरः । क्षुब्धो वै धेनुकश्चैव उत्कण्ठस्ततः परम् । सिंहासनो रतिनागो विद्याधरस्तु षोडशः" तत्तच्छब्दे तेषां लक्षणानि दृश्यानि । स्मरदीपिकोक्ता अन्येऽपि बन्धाः सन्ति यथा

"कामप्रदो विपरीतो नागरो रतिपाशकः । केयूरः प्रियतोषश्च ततः सम्पदस्तथा । ततश्चैकपदो ज्ञेयः सम्पुटश्चार्द्धसम्पुटः । ततः स्तनभरश्चैव ततोऽनुरतिसुन्दरः । ऊरुपीडामरुच्चक्रौ ततस्तोत्क्रमः स्मृतः । वेष्टको हंसकीलस्तु ततो लीलासनस्तथा । अष्टादश क्रमाद्बन्धाः स्त्रीणां बहूत्सवप्रदाः । पुंसां सुखकराश्चैव कथितास्तु क्रमात्ततः" । प्रवाहरूपेण सततं देहाद्देहान्तरगतिरूपे ६संसारे च ।

**बन्धक** न० बन्धे स्थापितं धनम् कन् । ऋणशोधार्थम् विश्वासहेतुतया आधीकृते १पदार्थे शब्दर० । स्वार्थे क ।२विनिमये पु० मेदि० । ३रतहिण्डके नानार्थमाला । ४पुंश्चल्यां स्त्री अमरः । ५हस्तिन्यां मेदि० उभयत्र गौरा० ङीष् । ६पञ्चपुरुषगामिन्यां स्त्रियाम् भा० आ० १२२अ० ।

**बन्धन** न० बन्ध-भावे ल्युट् ।१निगड़ादिना २संयमने अमरः २वधे मेदि० । करणे ल्युट् । ३तद्धेतौ रज्ज्वौ । हेमच०

**बन्धनवेश्मन्** न० ६त० । कारागारे हारा० । बन्धनागारादयोऽप्यत्र । बन्धनालयोऽपि तत्रार्थे अमरः ।

**बन्धनस्तम्भ** पु० ६त० । हस्तिसंयमनकाष्ठे आलाने अमरः ।

**बन्धित्र** पु०बन्ध इत्र । १कामदेवे उणादि० । २चर्म्मव्यजने संक्षि०

**बन्धु** पु० बध्नाति मनः स्नेहादिना बन्ध-उ । १ज्ञातौ मातुलपुत्रादौ अमरः । "२बन्धुभ्यः पितृमातृतः" इति स्मृतिः बान्धवे ३मित्रे ४पितरि ५मातरि ६भ्रातरि ७बन्धुजीववृक्षे च स्वार्थे अण् । बान्धव तत्रार्थे बन्धवश्च त्रिविधाः पारिभाषिका आत्मबन्धुशब्दे पितृबन्धुशब्दे उक्ता मातृबन्धुशब्दे वक्ष्यमाणाश्च दृश्याः । अतएव "तत्सुतो गोत्रजो बन्धुरिति" याज्ञ० तएव ग्राह्या इति मिता० । दायभागमते तु मातामहादयोऽपि बन्धवः अतएव "तत्सुतो गोत्रजो बन्धुरिति" याज्ञ०व्या० तेन बन्धुपदेन असगोत्राणां मातामहादीनां ग्रहणमित्युक्तम् । अतो मतभेदेन धनग्रहणे व्यवस्थाभेदः ।

**बन्धुक** पु० बन्ध-उक । बन्धुजीववृक्षे शब्दरत्ना० ।

**बन्धुजीव(क)** पु०बन्धुरिव जीवयति जीवि-अण् ण्वुल् वा । बन्धुजीववृक्षे । (बांधुलि) वृक्षे अमरः । [च अमरः

**बन्धुता** स्त्री बन्धु+संघे भावे तल् वा । १बन्धुसमूहे, २तद्भावे

**बन्धुदत्त** न० ३त० । १स्त्रीधनभेदे "बन्धुदत्तं तथा शुल्क